## विनोद:



## सुभाषितम्

नारीकेलसमाकारा दृश्यन्तेपि हि सज्जना: ।

अन्ये बदरिकाकारा बहिरेव मनोहरा: ॥

अनुवाद:- साधव: नारीकेल इव सन्ति । बाहयत: तेषां वर्तनं कठोरं आभाति किन्तु तेषां हृदयं अतिकोमलम् अस्ति। किन्तु अन्ये जना: बदरिफलं इव । तेषां वाणी वर्तनं च मधूरं आभाति किन्तु हृदयं मलिनं निष्ठूरं च ।



पाक्षिक-संस्कृतप्रभातम्, उत्पन्ना-एकादशी कार्तिक: शु.११ मङ्गलवासरे युगाब्दे ५११६; दक्षिणायण, अंक: १० वर्ष: १ दि– १८ नोव्हेम्वर:२०१४

# संस्कृत-प्रभातम्



॥ प्रार्थना ॥

तापत्रयेणाभिहतस्य घोरे सन्तप्यमानस्य भवाध्वनीश ।

पश्यामि नाान्यच्छरणं तवाङ्घ्रिद्वन्द्वातपत्रादमृताभिवर्षात् ॥

अनुवाद:- हे भगवन्! अस्मिन् भवे त्रिविधै: तापै: विह्वलस्य तथा जन्ममृत्यूचक्रस्य दु:खै: तप्तस्य जीवस्य केवल: आश्रय: भवत: श्रीचरणद्वयम् अस्ति । एतौ चरणौ छत्रम् इव स्त: । इदं छत्रम् जीवान् संसारतापात् रक्षति तथा आनन्दामृतस्य वृष्टिम् अपि करोति ।

# अनुक्रमणिका

प्रार्थना..............................१
संकेत................................२
सम्पादकीयम्.......................३
सम्भाषणम्.........................४
पदरञ्जनी...........................५
शब्दसङ्ग्रह: ........................६
कथा .................................७
सुभाषितम्...........................८

---

## संस्कृत-प्रभातम् सङ्घ

धीरशांत दास:

कनाई कृष्ण दास:

श्यामलीला दास:

निरज: पोकळे

सागर: कुलकर्णी

अभिषेक:

जय गोपाल दास:

अजयगौराङ्ग दास:

---

प्रकाशनं मुद्रणं च संकेत- धीरशांत दास:, कनाई कृष्ण दास:
पाक्षिक- संस्कृतप्रभातम्, इस्कॉन, हरे कृष्ण चौक,
५० गोकुलनगरम् कोंढवा - पुणे-४८
विद्युत/अणुपत्रम् संकेत
d16108@gmail.com, sanskritprabhatam@gmail.com.
भ्रमणध्वनी-८८८८८४४६४८/९४२३२३४४३०



पाक्षिक-संस्कृतप्रभातम्, उत्पन्ना-एकादशी कार्तिक: शु.११ मङ्गलवासरे युगाब्दे ५११६; दक्षिणायण, अंक: १० वर्ष: १ दि– १८ नोव्हेम्बर:२०१४

# शब्द सङ्ग्रह्






## कथा



### ‘पुनर्मूषिको भव’

महर्षिगौतमस्य तपोवने एक: महातप: नाम: मुनि अस्ति । तत्र तेन मुनिना काकेन मूषकशावक: अनयत् इति दृष्ट: । तत: स्वभावदयात्मना तेन निवारकणै: सवंर्धित:। तत: बिडाल: तं मूषकं खादितुम् उपधावति । तम् अवलोक्य मूषिक: तस्य मुने: क्रोडे प्रविवेश । तत: मुनिन उक्तम् - हे मूषिक! त्वं मार्जारो भव । तं मूषक: बिडाल: अभवत् । तत: स: बिडाल: कुक्कुरं दृष्ट्वा पलायते । ततो मुनिनोक्तम् - कुक्कुराद्बिभेषि? त्वमेव कुक्कुर: भव । स: च कुक्कुरो व्याघ्राद्बिभेति । तत: तेन मुनिना कुक्कुरो व्याघ्र: कृत: । अथ तं व्याघ्रं मुनि. र्मूषकोऽमिति पश्यति । अथ तं मुनिं दृष्ट्वा व्याघ्रं च सर्वे वदन्ति -‘अनेन मुनिना मूषको व्याघ्रतां नीत:।’ एतच्छ्रुत्वा स: व्याघ्रोऽचिन्तयत् - ‘यावदनेन मुनिना स्थीयते तावदिदं मे स्वरूपाख्यानमकीर्तिकरं न पलायिष्यते’ इत्यालोच्य मूषिक: तं मुनिं हन्तुं गत: । ततो मुनिना तत् ज्ञात्वा ‘पुनर्मूषिको भव’ इत्युक्त्वा मूषिक: एव कृत: ।

**बोध:-** श्रीभगवत्कृपया तथा सतां कृपया कोऽपि मनुष्य: आध्यात्मिकजीवने यश: कीर्तिं च उपैति । किन्तु यदि स: मत्तं कृतघ्नं च भूत्वा भगवति सति च अपराध करोति तर्हि तस्य गति पूर्ववत् एव । श्रीभगवान् तं विभूतिहीनं कृत्वा तस्य मूलस्थित्याम् क्षिपति । -०००-



पाक्षिक-संस्कृतप्रभातम्, उत्पन्ना-एकादशी कार्तिक: शु.११ मङ्गलवासरे युगाब्दे ५११६; दक्षिणायण, अंक: १० वर्ष: १ दि– १८ नोव्हेम्बर:२०१४

## सम्पादकीयम्

बहव: जना: ‘सर्वे देवा: समाना: सन्ति’ इति चिन्तयन्ति । एतेन कारणेन कस्यापि देवस्य अर्चनेन एकं फलं वा समानं फलं प्राप्तं भवति इति तेषां चेतसा अस्ति। अन्ये वदन्ति अहमपि भगवान! भवानपि भगवान! वयं सर्वे भगवन्त:। किन्तु शास्त्रं एषा कल्पना अस्वीकृता । अस्माकं परमं कर्तव्यम् अस्ति अहं क:? भगवान् क:? मम भगवत: सम्बन्ध क:? देवा: के? इति जिज्ञासां करणीयम्। यदि वयं एतत् न जानाम: तर्हि वयं कदाऽपि अस्माकं जीवनस्य उद्देशं न प्राप्तं कर्तुं शक्नोम: । श्रीकृष्ण: गीतायां स्पष्टं वदति- *यान्ति देवव्रता देवान् पितृन् यान्ति पितृव्रता: । भूतानि यान्ति भूतेज्या यान्ति मद्याजिनोऽपि माम् ।।* किन्तु बहव: जना: - *आकाशात् पतितं तोयं यथा गच्छति सागरम् । सर्व देवं नमस्कार: केशवं प्रति गच्छति ।।* एष: श्लोक: दर्शयति । एनेन तेषां विश्वास: वर्धते। किन्तु एतस्मिन् श्लोके स्पष्टम् अस्ति ‘केशवं प्रति गच्छति’ अर्थात् केशव: सर्वेषाम् स्त्रोत: वा विभिन्न: अस्ति एतत् स्पष्टं भवति । ऋग्वेदे अपि ‘ *तद् विष्णो: परमं पदं सदा पश्यन्ति सूरय:* ’ तथैव श्रीमद्भागवते अपि *यं ब्रह्मा वरुणेद्ररूद्रमरुत:स्तुन्वन्ति दिव्यै: स्तवै: वेदै: साङ्गपदक्रमोपनिषदैर्गायन्ति यं सामगा : ....।।*

यदि सर्वे देवा: मुनय: वेदा: शास्त्रानि च स्पष्टं भेदं दर्शयन्ति तर्हि सर्वे देवा: समाना: कथं शक्यम्? श्रीचैतन्यचरितामृते कृष्णदास-कविराज-गोस्वामी वदति- *एकले ईश्वर कृष्ण आर सब भृत्य ।* अत: स्वामी सेवकौ समानौ कथं शक्यम् अस्ति । स्कन्दपुराणे एक: श्लोक: अस्ति- *वासूदेवं परित्यज्य योऽन्यदेवमुपासते। स्वमातरं परित्यज्य स्वपचीं वन्दते हि स:।।* अत: एव ये जना: भिन्नानां देवतानाम् अर्चनं कुर्वन्ति ते भिन्नं भिन्नं फलं प्राप्नुवन्ति ।

ईश्वरा: बहव: सन्ति किन्तु परमेश्वर: कृष्ण एव अस्ति । अत: एव शास्त्रं वदति- *वेदे रामायणे चैव पुराणे भारते तथा । आदौ मध्ये तथा चान्ते हरि: सर्वत्र गीयते ।।* कृपया आगच्छन्तु वयं सर्वे हरे: चरणौ प्रार्थनां कुर्वन्तु । हे केशव ! हे कृष्ण! मम रतिं भवत: चरणौ स्थापयितु ।

**-:o:-**

## सम्भाषणम्



दूरवाण्या: सम्भाषणम्

चित्रक:- हरे कृष्ण !

लतिका: - हरे कृष्ण ! क: वदति ?

चित्रक - चित्रक: अस्मि। अनुजे ! कथमसि? गृहे कोऽपि नास्ति किम्?

लतिका: - सर्वं कुशलम् । गृहे माता अर्चनं करोति। पिता अग्रजा च मालां जपति। पितामह: स्नानं करोति

चित्रक: - त्वं किं करोषि ?गृहे क्रिडसि वा?

लतिका - अहं पठामि। उत्तरं लिखामि। तव सख्य: किं कुर्वन्ति ?

चित्रक: - मम सख्य: शालां गतवन्त:। अहं मातुल: च विद्यालयं गच्छाव: ।

लतिका - अद्य त्वमपि विद्यालयं न अगच्छत् ? अहमपि न गतवान्। अद्य मातुल: कार्यालयं न गतवान् वा ?

चित्रक: - अद्य मातुल: विरामं स्वीकृतवान्।

लतिका - चित्रक! चिन्ता मास्तु। अत्र सर्वे सम्यक् सन्ति।

चित्रक: - आम् !अनन्तरं दुरध्वनीं करोमि। धन्यवाद:। हरे कृष्ण।



पाक्षिक-संस्कृतप्रभातम्, उत्पन्ना-एकादशी कार्तिक: शु.११ मङ्गलवासरे युगाब्दे ५११६; दक्षिणायण, अंक: १० वर्ष: १ दि– १८ नोव्हेम्बर:२०१४

## पदरञ्जनी

### ९ पदरञ्जन्या उत्तरम्

| | | | | | |
|---|---|---|---|---|---|
| १ के | २श | री | ■ | ३अ | ४ ज |
| शी | ब | ■ | ५ क | पि | ल |
| ■ | री | ■ | या | ■ | ■ |
| ६ दे | ■ | ७ व | धू | ■ | ८ रा |
| ९ व | सू | ■ | ■ | १० य | क्ष |
| ११ ल | व | ■ | १२नि | वा | स |

### १० पदरञ्जनी

| | | | | | |
|---|---|---|---|---|---|
| १ | | ■ | २ | | ३ |
| | ■ | ४ | | ■ | |
| ५ | ६ | | ■ | ७ | |
| ■ | | ■ | ८ | | ■ |
| ९ | | १० | | ■ | ११ |
| | ■ | १२ | | | |

ऊर्ध्व शब्द -

१. वायु। २. नेत्र: । ३. दृष्टिक्षेप, काक्ष:। ४. देवानाम् नृप:। ६. जमदग्निमुने: पत्नी। ७. श्रवणेन्द्रियम्। ८.एतस्य नित्यपाके उपयोगं भवति, लघू बीजानि सन्ति, गन्ध द्रव्यम्। ९. प्रथम अङ्क:। १०. इच्छा , कामना। ११. यशोदाया: पति।

दिगंतसम शब्द -

१. मार्ग:।, २. जल/रस पानाय एकं लघूपात्रम्। ४. एतेन वृक्षेन शर्करा, गुड: निर्मिति भवति। ५. राजा, नृप:। ७. प्रकोष्ठ:। ८. पुरातन, स्थविर। ९.समानाकार:,